नशनम्, नाशनम्, निनशिषणम्-निनङ्क्षणम्, नानशनम्;
नशित्वा-नंष्ट्वा-[1]नष्ट्वा, नाशयित्वा, निनशिषित्वा, निनङ्क्षित्वा, नानशित्वा;
प्रणश्य, प्रणाश्य, प्रणिनशिष्य-प्रणिनङ्क्ष्य, प्रणानश्य;
[2]अजकनाशं [नष्टः], विद्युत्प्रणाशं [नष्टः], [3]जीवनाशं[A] [नष्टः],
नाशम् २, नशित्वा-नंष्ट्वा-नष्ट्वा-२, } नाशम् २, नाशयित्वा २, } निनशिषम् २-निनङ्क्षम् २, निनशिषित्वा २-निनङ्क्षित्वा २, } नानशम् २; नानशित्वा २. }

(668) " णस कौटिल्ये " (I-भ्वादिः-627. अक. सेट्. आत्म.)

'शब्दार्थे नासते नासेः, कौटिल्ये नसते नसेः ॥' (श्लो. 184) इति देवः।
नासकः-सिका, नासकः-सिका, निनसिषकः-षिका, नानसकः-सिका;
[4]विनः-विनसौ-विनसः, [B]नसितः, इत्यादीनि सर्वाण्यपि रूपाणि भौवादिक-णभतिवत् (661) ज्ञेयानि।

(669) " णह बन्धने " (IV-दिवादिः-1166. सक. अनि. उभ.)

नाहकः-हिका, नाहकः-हिका, [5]निनत्सकः-त्सिका, नानहकः-हिका;

---

1. 'रधादिभ्यश्च' (7-2-45) इतीड्विकल्पः। इट्पक्षे नशित्वा इति रूपम्। इडभावपक्षे 'मस्जिनशोर्झलि' (7-1-60) इति नुमि, नंष्ट्वा इति रूपम्। 'जान्तनशां विभाषा' (6-4-32) इति क्त्वायां नकारस्य विकल्पेन लोपे नष्ट्वा इति रूपम्।]
2. 'उपमाने कर्मणि च' (3-4-45) इति णमुल्। 'कषादिषु यथाविध्यनुप्रयोगः' (3-4-46) इति णमुलन्तस्य धातोः अनुप्रयोगः। अजकश्च नष्ट इत्यर्थः। विद्युत्प्रणाशं नष्टः इत्यत्राप्येवमेव।
3. 'कर्त्रोर्जीवपुरुषयोर्नशिवहोः' (3-4-43) इति णमुल्। 'कषादिषु—' (3-4-46) इति अनुप्रयोगः। जीवो नश्यतीत्यर्थः।
4. क्विपि सोः रुत्वविसर्गयोः रूपम्। 'अत्वसन्तस्य चाधातोः' (6-4-14) इत्यत्र 'अधातोः' इत्युक्तत्वात् न दीर्घः।
5. 'णो नः' (6-1-65) इति नत्वे, धातोरनुदात्तत्वात् सन इण्निषेधे, 'नहो धः' (8-2-34) इति हकारस्य धकारे, 'खरि च' (8-4-55) इति चर्त्वे च रूपम्। एवं सन्नन्ते सर्वत्र प्रक्रिया बोध्या।

A. 'चकम्पेऽतीव चुक्रोश जीवनाशं ननाश च ॥' भ. का. 14.31.
B. 'नासोत्थरासलसितान् नसितेन दाम्ना सूतो ययाम समराभ्यसितांस्तुरङ्गान् ॥' धा. का. 1.79.